NAAC

NATIONAL ASSESSMENT AND ACCREDITATION COUNCIL

स्वतन्त्रतायाः अमृतमहोत्सवः

## राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदः (NAAC) छात्रसन्तुष्टिसर्वेक्षणे प्रतिभागं कुर्वन्तु।

गुणवत्तासंवर्धनार्थं स्वकीयम् अभिमतं ददतु।




### अयि प्रियाः छात्राः!

राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा छात्रसन्तुष्टिसर्वेक्षणस्य प्रयासः क्रियते। एतस्य सर्वेक्षणस्य परिणामः विश्वविद्यालयस्य मान्यताप्रक्रियायां समाहितः भविष्यति। विश्वविद्यालयस्य गुणवत्तासंवर्धनार्थम् एतत् सर्वेक्षणं विश्वविद्यालयद्वारा प्रदत्तछात्रसूचीतः यथेच्छरूपेण स्वीकृतानां छात्राणां प्रतिक्रियायाः आधारे भविष्यति।

विश्वविद्यालयस्य गुणवत्तासंवर्धनस्य मूल्याङ्कनस्य च प्रक्रियायां स्वीयम् अभिप्रायं वक्तुं छात्रेभ्यः अवसररूपेण राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा साक्षात् एतत् सर्वेक्षणं क्रियते। एषा परिषद् सर्वेक्षणार्थं विश्वविद्यालयेन प्रदत्तेभ्यः छात्राणाम् ई-मेल् सङ्केतेभ्यः एकं लिंक (Link) प्रेषयिष्यति। येषां छात्राणां कृते लिंक आगमिष्यति, ते निर्धारिते समये सर्वेक्षणार्थम् आत्मनः प्रतिक्रियां प्रदास्यन्ति।



### • आत्मनः शिक्षासंस्थानं स्वयं मूल्याङ्कनीयम्

एषा प्रश्नावली 'लिकर्ट-मापनी' अस्ति, अर्थात् छात्रैः स्वप्रतिक्रिया नकारात्मकतायां 0 (शून्यतः) आरभ्य सकारात्मकतायां ४ (चत्वारि) पर्यन्तं प्रदातव्या। इत्थम् अस्यां श्रेणीप्रक्रियायां सर्वतः निम्नमूल्याङ्कनाय '0' (शून्याङ्कः) सर्वतः उच्चमूल्याङ्कनाय च ४ (चत्वारः अङ्काः) भवन्ति। सङ्ग्रहणात् परं प्रतिक्रियाणां विश्लेषणं सॉफ्टवेयरमाध्यमेन भवति। विश्वविद्यालयस्य श्रेणीनिर्धारणप्रक्रियायां छात्रसन्तुष्टिसर्वेक्षणस्य अङ्कानां महत्त्वपूर्णभूमिका अस्ति।

### • परिष्कारार्थम् उपायान् सूचयन्तु!

छात्रसन्तुष्टिसर्वेक्षणे एकविंशतौ प्रश्नेषु विंशतिः प्रश्नाः वस्तुनिष्ठप्रश्नाः भविष्यन्ति। एकस्मिन् प्रश्ने छात्राः आत्मनः अभिमतं लिखितरूपेण अपि निवेदयितुं शक्नुवन्ति। एतस्य प्रश्नस्य प्रतिकियायां छात्राः संस्थायाः संवर्धनार्थम् आत्मनः निरीक्षणं समीक्षणं च प्रकाशयितुं शक्नुवन्ति। एतस्यां प्रश्नावल्याम् अध्ययन-अध्यापनप्रक्रियायाः कतिचन पक्षाः सन्ति।

### • भवदीयः परिचयः गुप्तः भविष्यति

सर्वेक्षणार्थं सॉफ्टवेयर स्वेच्छया छात्राणां चयनं करिष्यति। केन छात्रेण छात्रसन्तुष्टिसर्वेक्षणस्य ई-मेल प्राप्तम्, तेन च का प्रतिक्रिया प्रदत्ता इति तं छात्रं विहाय अन्यः कोऽपि न ज्ञास्यति। अतः सम्पूर्णप्रक्रियायां प्रतिक्रियादाता विद्यार्थी अज्ञातः एव भविष्यति। सर्वेक्षणस्य अधिकं विवरणं NAAC इत्यस्य अन्तर्जालस्थले अस्ति – http://www.naac.gov.in/apply-now

संस्थायाः श्रेणीनिर्धारणे छात्रसर्वेक्षणस्य ३०% तः ६०% भारः (संस्थायाः स्वरूपानुगुणम्) भवति इत्यतः छात्राणां प्रतिक्रिया महत्वपूर्णा वर्तते । अतः आकांक्षितम् अस्ति यत् सर्वेक्षणे छात्राणां सक्रियभागग्रहणं न केवलं छात्रान् सशक्तान् करिष्यति अपितु छात्रसङ्गतिमाध्यमेन शिक्षासंस्थानस्य निरन्तरं गुणवत्तासंवर्धनार्थमपि सहायतां करिष्यति इति ।

सहायतार्थं सम्पर्कसूत्रम् -
प्रो. कुलदीपशर्मा, समन्वयकः, IQAC
E-mail – helpdesk@csu.co.in,
सहायतापीठम् (Helpdesk): 011-28524993
NAAC Helpdesk: +91-080-23005192, 193 E-mail: naachelpdesk@gmail.com